यः कर्णांजलिसंपुटैरहरहः सम्यक्पिब
त्यादराद्वाल्मीकेर्वदनारविंदगलितं रा
मायणाख्यं मधु ॥ जन्मव्याधिजरा
विपत्तिमरणैरत्यंतसोपद्रवं संसारं स
विहाय गच्छति पुमान्विष्णोः पदं
साश्वतम् ॥ १२ ॥ तदुपगतसमाससंधि
योगं सममधुरोपनतार्थवाक्यबद्धम् ॥
रघुवरचरितं मुनिप्रणीतं दशशिरस

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मू० श्व वर्धं निशामयध्वम् ॥ १३ ॥ यत्र रा०
४ यत्र रघुनाथकीर्तनं तत्र तत्र कृतम
स्तकांजलिम् ॥ बाष्पवारिपरिपूर्णलो
चनं मारुतिं नमत राक्षसांतकम्॥१४॥
वाल्मीकिगिरिसंभूता रामसागरगामि
नी ॥ पुनातु भुवनं पुण्या रामायण
महानदी ॥ १५ ॥ जितं भगवता तेन ४
हरिणा लोकधारिणा ॥ अजेन विश्वरू

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पेण निर्गुणेन गुणात्मना ॥ १६ ॥ तपः
स्वाध्यायनिरतं तपस्वी वाग्विदां वर
म् ॥ नारदं परिपप्रच्छ वाल्मीकिर्मुनि
पुंगवम् ॥ १७ ॥ कोन्वस्मिन्साम्प्रतं
लोके गुणवान्कश्च वीर्यवान् ॥ धर्म
ज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥
॥ १८ ॥ चारित्रेण च को युक्तः सर्वभू
तेषु को हितः ॥ विद्वान्कः कः समर्थश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कश्चैकः प्रियदर्शनः ॥ १९ ॥ आत्मवा
न्को जितक्रोधो द्युतिमान्कोनसूय
कः ॥ कस्य बिभ्यति देवाश्च जातरोष
स्य संयुगे ॥ २० ॥ एतदिच्छाम्यहं श्रो
तुं परं कौतूहलं हि मे ॥ महर्षे त्वं समर्थो
सि ज्ञातुमेवंविधं नरम् ॥ २१ ॥ श्रुत्वा चै
तत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ॥
श्रूयतामिति चामंत्र्य प्रहृष्टो वाक्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मब्रवीत् ॥ २२ ॥ बहवो दुर्लभाश्चैव ये
त्वया कीर्तिता गुणाः ॥ मुने वक्ष्याम्य
हं बुद्धा तैर्युक्तः श्रूयतां नरः ॥ २३ ॥
इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रु
तः ॥ नियतात्मा महावीर्यो द्युतिमा
न्धृतिमान्वशी ॥ २४ ॥ बुद्धिमान्नीति
मान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः ॥
विपुलांसो महाबाहुः कंबुग्रीवो महाह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नुः ॥ २५ ॥ महोरस्को महेष्वासो गूढ
जत्रुररिंदमः ॥ आजानुबाहुः सुशिराः
सुललाटः सुविक्रमः ॥२६॥ समः स
मविभक्तांगः स्निग्धवर्णः प्रतापवान् ॥
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभ
लक्षणः ॥२७॥ धर्मज्ञः सत्यसंधश्च
प्रजानां च हिते रतः ॥ यशस्वीज्ञान
संपन्नः शुचिर्वश्यः समाधिमान् ॥२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजापतिसमः श्रीमान्धाता रिपुनि
षूदनः ॥ रक्षिता जीवलोकस्य धर्मस्य
परिरक्षिता ॥ २९ ॥ रक्षिता स्वस्य
धर्मस्य स्वजनस्य च रक्षिता ॥ वेदवेदां
गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ ३० ॥
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान्प्रति
भानवान् ॥ सर्वलोकप्रियः साधुरदी
नात्मा विचक्षणः ॥ ३१ ॥ सर्वदाऽभि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गतः सद्भिः समुद्र इव सिंधुभिः ॥ आ
र्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥
॥ ३२ ॥ स च सर्वगुणोपेतः कौसल्या
ऽनंदवर्द्धनः ॥ समुद्र इव गांभीर्ये धैर्येण
हिमवानिव ॥ ३३ ॥ विष्णुना सदृशो
वीर्ये सोमवत्प्रियदर्शनः ॥ कालाग्नि
सदृशः क्रोधे क्षमया पृथिवीसमः ॥
॥ ३४ ॥ धनदेन समस्त्यागे सत्ये धर्म

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इवापरः ॥ तमेवंगुणसंपन्नं रामं सत्य
पराक्रमम् ॥ ३५ ॥ ज्येष्ठं श्रेष्ठगुणैर्युक्तं
प्रियं दशरथः सुतम् ॥ प्रकृतीनां हितैर्यु
क्तं प्रकृतिप्रियकाम्यया ॥ ३६ ॥ यौ
वराज्येन संयोक्तुमैच्छत्प्रीत्या महीप
तिः ॥ तस्याभिषेकसंभारान्दृष्ट्वा भा
र्याथ कैकयी ॥ ३७ ॥ पूर्वं दत्तवरा दे
वी वरमेनमयाचत ॥ विवासनं च रा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मस्य भरतस्याभिषेचनम् ॥ ३८ ॥
स सत्यवचनाद्राजा धर्मपाशेन संय
तः ॥ विवासयामास सुतं रामं दशरथ
प्रियम् ॥ ३९ ॥ स जगाम वनं वीरः प्र
तिज्ञामनुपालयन् ॥ पितुर्वचननिर्दे
शात्कैकेय्याः प्रियकारणात् ॥ ४० ॥
तं व्रजंतं प्रियो भ्राता लक्ष्मणोऽनुज
गाम ह ॥ स्नेहाद्विनयसंपन्नः सुमित्रानं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

दवर्द्धनः ॥ ४१ ॥ भ्रातरं दयितो भ्रातुः
सौभ्रात्रमनुदर्शयन् ॥ रामस्य दयिता
भार्या नित्यं प्राणसमा हिता ॥ ४२ ॥
जनकस्य कुले जाता देवमायेव निर्मि
ता ॥ सर्वलक्षणसम्पन्ना नारीणामुत्त
मा वधूः ॥ ४३ ॥ सीताप्यनुगता रामं
शशिनं रोहिणी यथा ॥ पौरैरनुगतो दूरं
पित्रा दशरथेन च ॥ ४४ ॥ शृंगवेरपुरे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूतं गंगाकूले व्यसर्जयत् ॥ गुहमासा
द्य धर्मात्मा निषादाधिपतिं प्रियम् ॥
॥४५॥ गुहेन सहितो रामो लक्ष्मणेन
च सीतया ॥ ते वनेन वनं गत्वा नदी
स्तीर्त्वा बहूदकाः ॥ ४६ ॥ चित्रकूटम
नुप्राप्य भरद्वाजस्य शासनात् ॥ रम्य
मावसथं कृत्वा रममाणा वने त्रयः ॥
॥ ४७ ॥ देवगंधर्वसंकाशास्तत्र ते न्यव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सन् सुखम् ॥ चित्रकूटं गते रामे पुत्र
शोकातुरस्तदा ॥ ४८ ॥ राजा दशरथः
स्वर्गं जगाम विलपन्सुतम् ॥ गते तु
तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः ॥
॥ ४९ ॥ नियुज्यमानो राज्याय नैच्छ
द्राज्यं महाबलः ॥ स जगाम वनं वीरो
रामपादप्रसादकः ॥५०॥ गत्वा तु सुम
हात्मानं रामं सत्यपराक्रमम् ॥ अया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चद् भ्रातरं राममार्यभावपुरस्कृतः ॥
॥ ५१ ॥ त्वमेव राजा धर्मज्ञ इति रामं व
चोब्रवीत् ॥ रामोपि परमोदारः सुमुखः
सुमहायशाः ॥ ५२ ॥ न चैच्छत्पितु
रादेशाद्राज्यं रामो महाबलः ॥ पादुके
चास्य राज्याय न्यासं दत्त्वा पुनः पुनः
॥ ५३ ॥ निवर्तयामास ततो भरतं भर
ताग्रजः ॥ स काममनवाप्यैव राम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

पादावुपस्पृशन् ॥ ५४ ॥ नंदिग्रामेऽकरो
द्राज्यं रामागमनकांक्षया ॥ गते तु भ
रते श्रीमान्सत्यसंधो जितेंद्रियः ॥
॥ ५५ ॥ रामस्तु पुनरालक्ष्य नागरस्य
जनस्य च ॥ तत्रागमनमेकाग्रो दंडका
न्प्रविवेश ह ॥ ५६ ॥ प्रविश्य तु महार
ण्यं रामो राजीवलोचनः ॥ विराधं रा
क्षसं हत्वा शरभंगं ददर्श ह ॥ ५७ ॥ सु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रात
रं तथा ॥ अगस्त्यवचनाच्चैव जग्राहैंद्रं
शरासनम् ॥ ५८ ॥ खड्गं च परमप्रीत
स्तूणी चाक्षय्यसायकौ ॥ वसतस्त
स्य रामस्य वने वनचरैः सह ॥ ५९ ॥
ऋषयोऽभ्यागमन्सर्वे वधायासुररक्षसा
म् ॥ स तेषां प्रतिशुश्राव राक्षसानां त
दा वने ॥ ६० ॥ प्रतिज्ञातश्च रामेण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

वधः संयति रक्षसाम् ॥ ऋषीणामग्निक
ल्पानां दंडकारण्यवासिनाम् ॥ ६१ ॥
तेन तत्रैव वसता जनस्थाननिवासि
नी ॥ विरूपिता शूर्पणखा राक्षसी का
मरूपिणी ॥ ६२ ॥ ततः शूर्पणखावा
क्यादुद्युक्तान्सर्वराक्षसान् ॥ खरं त्रि
शिरसं चैव दूषणं चैव राक्षसम्
॥ ६३ ॥ निजघान रणे रामस्तेषां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चैव पदानुगान् ॥ वने तस्मिन्निवसता
जनस्थाननिवासिनाम् ॥ ६४ ॥ रक्षसां
निहतान्यासन्सहस्राणि चतुर्दश ॥
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमू
र्छितः ॥ ६५ ॥ सहायं वरयामास मा
रीचं नाम राक्षसम् ॥ वार्यमाणः सबहु
शो मारीचेन स रावणः ॥ ६६ ॥ न वि
रोधो बलवता क्षमो रावण तेन ते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अनादृत्य तु तद्वाक्यं रावणः कालचो
दितः ॥ ६७ ॥ जगाम सहमारीचस्त
स्याश्रमपदं तदा ॥ तेन मायाविना दूर
मपवाह्य नृपात्मजौ ॥ ६८ ॥ जहार
भार्यां रामस्य गृध्रं हत्वा जटायुषम् ॥
गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथि
लीम् ॥ ६९ ॥ राघवः शोकसंतप्तो
विललापाकुलेंद्रियः ॥ ततस्तेनैव शो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केन गृध्रं दग्ध्वा जटायुषम् ॥ ७० ॥
मार्गमाणो वने सीतां राक्षसं संददर्श
ह ॥ कबंधं नाम रूपेण विकृतं घोरद
र्शनम् ॥७१॥ तं निहत्य महाबाहुर्ददा
ह स्वर्गतश्च सः ॥ स चास्मै कथयामा
स शबरीं धर्मचारिणीम् ॥ ७२ ॥ श्रम
णां धर्मनिपुणामभिगच्छेति राघव ॥ १३
सोभ्यगच्छन्महातेजाः शबरीं शत्रुसू

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

दनः ॥ ७३ ॥ शबर्या पूजितः सम्यग्रा
मो दशरथात्मजः ॥ पंपातीरे हनुमता
संगतो वानरेण ह ॥ ७४ ॥ हनुमद्वच
नाच्चैव सुग्रीवेण समागतः ॥ सुग्रीवा
य च तत्सर्वं शंसद्रामो महाबलः ॥
॥ ७५ ॥ आदितस्तद्यथावृत्तं सीता
यास्च विशेषतः ॥ सुग्रीवश्चापि तत्सर्वं
श्रुत्वा रामस्य वानरः ॥ ७६ ॥ चकार

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ॥
ततो वानरराजेन वैरानुकथनं प्रति ॥
॥ ७७ ॥ रामायावेदितं सर्वं प्रणयाद्दुः
खितेन च ॥ प्रतिज्ञातं च रामेण तदा
वालिवधं प्रति ॥ ७८ ॥ वालिनश्च बलं
तत्र कथयामास वानरः ॥ सुग्रीवः
शंकितश्चासीन्नित्यं वीर्येण राघवे
॥ ७९ ॥ राघवप्रत्ययार्थं तु दुंदुभेः का

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यमुत्तमम् ॥ दर्शयामास सुग्रीवो महा
पर्वतसन्निभम् ॥ ८० ॥ उत्स्मयित्वा
महाबाहुः प्रेक्ष्य चास्थि महाबलः ॥
पादांगुष्ठेन चिक्षेप संपूर्ण दशयोजन
म् ॥ ८१ ॥ बिभेद च पुनस्तालान्स
प्तैकेन महेषुणा ॥ गिरिं रसातलं चैव
जनयन्प्रत्ययं तदा ॥ ८२ ॥ ततः प्री
तमनास्तेन विश्वस्तः स महाकपिः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किष्किंधां रामसहितो जगाम च गुहां तदा ॥ ८३ ॥ ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिंगलः ॥ तेन नादेन महता निर्जगाम हरीश्वरः ॥ ८४ ॥ अनुमान्य तदा तारां सुग्रीवेण समागतः ॥ निजघान च तत्रैव शरेणैकेन राघवः ॥ ॥ ८५ ॥ ततः सुग्रीववचनाद्धत्वा वालिनमाहवे ॥ सुग्रीवमेव तद्राज्ये राघ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

वः प्रत्यपादयत् ॥ ८६ ॥ स च सर्वा
न्समानीय वानरान् वानरर्षभः ॥ दि
शः प्रस्थापयामास दिदृक्षुर्जनकात्म
जाम् ॥ ८७ ॥ ततो गृध्रस्य वचनात्सं
पातेर्हनुमान् बली ॥ शतयोजनवि
स्तीर्णं पुप्लुवे लवणार्णवम् ॥ ८८ ॥ त
त्र लंकां समासाद्य पुरीं रावणपालि
ताम् ॥ ददर्श सीतां ध्यायंतीमशोक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वनिकागताम् ॥ ८९ ॥ निवेदयित्वा ऽभिज्ञानं प्रवृत्तिं विनिवेद्य च ॥ समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ॥ ९० ॥ पञ्च सेनाग्रगान् हत्वा सप्त मंत्रिसुतानपि ॥ शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ९१ ॥ अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ॥ मंर्षयन् राक्षसान्वीरो मंत्रिणस्तान् यद्द

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

च्छया ॥९२ ॥ ततो दग्ध्वा पुरीं लंका
मृते सीतां च मैथिलीम् ॥ रामाय प्रि
यमाख्यातुं पुनरायान्महाकपिः ॥
॥ ९३ ॥ सोभिगम्य महात्मानं कृत्वा
रामं प्रदक्षिणम् ॥ न्यवेदयदमेयात्मा
दृष्टा सीतेति तत्त्वतः ॥ ९४॥ ततः सु
ग्रीवसहितो गत्वा तीरं महोदधेः॥समु
द्रं क्षोभयामास शरैरादित्यसन्निभैः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ९५ ॥ दर्शयामास चात्मानं समुद्रः सरितां पतिः ॥ समुद्रवचनाच्चैव नलं सेतमकारयत् ॥ ९६ ॥ तेन गत्वा पुरीं लंकां हत्वा रावणमाहवे ॥ रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ९७ ॥ तामुवाच ततो रामः परुषं जनसंसदि ॥ अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ९८ ॥ ततोग्निवचनात्सी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तां ज्ञात्वा विगतकल्मषाम् ॥ कर्मणा
तेन महता त्रैलोक्यं सचराचरम् ॥
॥ ९९ ॥ सदेवर्षिगणं तुष्टं राघवस्य म
हात्मनः ॥ बभौ रामः संप्रहृष्टः पूजि
तः सर्वदैवतैः ॥ १००॥ अभिषिच्य च
लंकायां राक्षसेंद्रं विभीषणम् ॥ कृतकृ
त्यस्तदा रामो विज्वरः प्रमुमोद ह॥१॥
देवताभ्यो वरं प्राप्य समुत्थाप्य च वान

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रान् ॥ अयोध्यां प्रस्थितो रामः पुष्पके
ण सुहृद्वृतः ॥२॥ भरद्वाजाश्रमं गत्वा
रामःसत्यपराक्रमः ॥भरतस्यांतिके रा
मोहनूमंतं व्यसर्जयत्।३॥पुनराख्यायि
कां जल्पन्सुग्रीवसहितस्तदा ॥ पुष्पकं
तत्समारुह्य नंदिग्रामं ययौ तदा॥४॥
नंदिग्रामे जटां हित्वा भ्रातृभिः सहि
तोनघः ॥ रामः सीतामनुप्राप्य राज्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुनरवासवान् ॥५॥ हृष्टः प्रमुदितो
लोकस्तुष्टः पुष्टः सुधार्मिकः ॥ नि
रामयो ह्यरोगश्च दुर्भिक्षभयवर्जि
तः ॥ ६ ॥ न पुत्रमरणं केचिद्रक्ष्यंति
पुरुषाः क्वचित् ॥ नार्यश्चाविधवा
नित्यं भविष्यंति पतिव्रताः ॥ ७ ॥
न चाग्निजं भयं किंचिन्नाप्सु मज्जंति
जंतवः ॥ न वातजं भयं किंचिन्नापि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मू० १९

ज्वरकृतं तथा ॥ ८ ॥ न चापि क्षुद्भयं तत्र न तस्करभयं तथा ॥ नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९ ॥ नित्यं प्रमुदिताः सर्वे यथाकृतयुगे तथा ॥ अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ११० ॥ गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ॥ असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ११ ॥

रा० १९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजवंशाञ्छतगुणान्स्थापयिष्यति रा
घवः ॥ चातुर्वर्ण्यं च लोकेस्मिन्स्वेस्वे
धर्मे नियोक्ष्यति॥ १२ ॥ दशवर्षसहस्रा
णि दशवर्षशतानि च ॥ रामो राज्यमुपा
सित्वा ब्रह्मलोकं प्रयास्यति॥१३॥ इदं
पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम्॥यः
पठेद्रामचरितं सर्वपापैःप्रमुच्यते॥१४॥
एतदाख्यानमायुष्यं पठन्रामायणं न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रः॥ सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ १५ पठन्द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात्। वणिग्जनः पुण्यफलत्वमीयाज्जनश्च शूद्रोपि महत्त्वमीयात् ॥ १६ ॥ चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ॥ एकैकमक्षरंपुंसांमहापातकनाशनम्॥१७॥रामाय रामभद्राय रामचन्द्रायवेधसे। रघु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection